# শ্রীগায়ত্রীকবচম্

{॥ শ্রীগায়ত্রীকবচম্ ॥}

শ্রীগণেশায় নমঃ ।

যাজ্ঞবল্ক্য উবাচ ।

স্বামিন্ সর্বজগন্নাথ সংশয়োঽস্তি মহান্মম ।

চতুঃষষ্ঠিকলানাং চ পাতকানাং চ তদ্বদ ॥

মুচ্যতে কেন পুণ্যেন ব্রহ্মরূপং কথং ভবেত্ ।

দেহশ্চ দেবতারূপো মন্ত্ররূপো বিশেষতঃ ॥

ব্রহ্মোবাচ ।

ক্রমতঃ শ্রোতুমিচ্ছামি কবচং বিধিপূর্বকম্ ।

ওঁ অস্য শ্রীগায়ত্রীকবচস্য ব্রহ্মবিষ্ণুরুদ্রা ঋষয়ঃ ।

ঋগ্যজুঃসামাঽথর্বাণি ছন্দাংসি ।

পরব্রহ্মস্বরূপিণী গায়ত্রী দেবতা ।

ভূঃ বীজম্ । ভুবঃ শক্তিঃ । স্বঃ কীলকম্ ।

শ্রীগায়ত্রীপ্রীত্যর্থে জপে বিনিয়োগঃ ।

ওঁ ভূর্ভুবঃ স্বঃ তৎসবিতুরিতি হৃদয়ায় নমঃ ।

ওঁ ভূর্ভুবঃ স্বঃ বরেণ্যমিতি শিরসে স্বাহা ।

ওঁ ভূর্ভুবঃ স্বঃ ভর্গো দেবস্যেতি শিখায়ৈ বষট্ ।

ওঁ ভূর্ভুবঃ স্বঃ ধীমহীতি কবচায় হুম্ ।

ওঁ ভূর্ভুবঃ স্বঃ ধিযো যো নঃ ইতি নেত্রত্রযায বৌষট্ ।

ওঁ ভূর্ভুবঃ স্বঃ প্রচোদযাদিতি অস্ত্রায ফট্ ।

অথ ধ্যানম্ ।

মুক্তাবিদ্রুমহেমনীলধবলচ্ছাযৈর্মুখৈস্ত্রীক্ষণৈ-

র্যুক্তামিন্দুনিবদ্ধরত্নমুকুটাং তত্ত্বার্থবর্ণাত্মিকাম্ ।

গাযত্রীং বরদাভযাঙ্কুশকশাং শুভ্রং কপালং গুণং

শংখ, চক্রমথারবিন্দুযুগলং হস্তৈর্বহন্তীং ভজে ॥

ওঁ গাযত্রী পূর্বতঃ পাতু সাবিত্রী পাতু দক্ষিণে ।

ব্রহ্মবিদ্যা তু মে পশ্চাদুত্তরে মাং সরস্বতী ॥ ১॥

পাবকীং চ দিশং রক্ষেৎপাবকোজ্জ্বলশালিনী ।

যাতুধানীং দিশং রক্ষেদ্যাতুধানগণার্দিনী ॥ ২॥

পাবমানীং দিশং রক্ষেৎপবমানবিলাসিনী ।

দিশং রৌদ্রীমবতু মে রুদ্রাণী রুদ্ররূপিণী ॥ ৩॥

ঊর্ধ্বং ব্রহ্মাণী মে রক্ষেদধস্তাদ্বৈষ্ণবী তথা ।

এবং দশ দিশো রক্ষেৎসর্বতো ভুবনেশ্বরী ॥ ৪॥

তৎপদং পাতু মে পাদৌ জংঘে মে সবিতুঃ পদম্ ।

বরেণ্যং কটিদেশং তু নাভিং ভর্গস্তথৈব চ ॥ ৫॥

দেবস্য মে তু হৃদযং ধীমহীতি গলং তথা ।

ধিযো মে পাতু জিহ্বাযাং যঃ পদং পাতু লোচনে ॥ ৬॥

ললাটে নঃ পদং পাতু মূর্দ্ধানং মে প্রচোদযাত্ ।

তদ্বর্ণঃ পাতু মূর্দ্ধানং সকারঃ পাতু ভালকম্ ॥ ৭॥

চক্ষুষী মে বিকারস্তু শ্রোত্রং রক্ষেত্তু কারকঃ ।

নাসাপুটে বকারো মে রেকারস্তু কপোলযোঃ ॥ ৮॥

ণিকারস্ত্বধরোষ্ঠে চ যংকারস্ত্বধরোষ্ঠকে ।

আস্যমধ্যে ভকারস্তু র্গোকারশ্চিবুকে তথা ॥ ৯॥

দেকারঃ কণ্ঠদেশে চ বকারঃ স্কন্ধদেশযোঃ ।

স্যকারো দক্ষিণং হস্তং ধীকারো বামহস্তকে ॥ ১০॥

মকারো হৃদযং রক্ষেদ্ধিকারো জঠরং তথা ।

ধিকারো নাভিদেশং তু যোকারস্তু কটিদ্বযম্ ॥ ১১॥

গুহ্যং রক্ষতু যোকার ঊরু মে নঃ পদাক্ষরম্ ।

প্রকারো জানুনী রক্ষেচ্চোকারো জংঘদেশযোঃ ॥ ১২॥

দকারো গুল্ফদেশং তু যাৎকারঃ পাদযুগ্মকম্ ।

জাতবেদেতি গাযত্রী ত্র্যম্বকেতি দশাক্ষরা ॥ ১৩॥

সর্বতঃ সর্বদা পাতু আপোজ্যোতীতি ষোডশী ।

ইদং তু কবচং দিব্যং বাধাশতবিনাশকম্ ॥ ১৪ ॥

চতুঃষষ্ঠিকলাবিদ্যাসকলৈশ্বর্যসিদ্ধিদম্ ।

জপারম্ভে চ হৃদযং জপান্তে কবচং পঠেত্ ॥ ১৫ ॥

স্ত্রীগোব্রাহ্মণমিত্রাদিদ্রোহাদ্যখিলপাতকৈঃ ।

মুচ্যতে সর্বপাপেভ্যঃ পরং ব্রহ্মাধিগচ্ছতি ॥ ১৬॥

॥ ইতি শ্রীমদ্বসিষ্ঠসংহিতাযাং গাযত্রীকবচং সম্পূর্ণম্ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Gayatri Kavacham Lyrics in Bengali PDF
% File name : gaayatriikavach.itx
% Category : kavacha
% Location : doc_devii
% Author : Traditional
% Language : Sanskrit

% Subject : philosophy/hinduism/religion
% Transliterated by : WebD
% Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com
% Description-comments : vasiShTha saMhitA
% Latest update : August 17, 2004
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website